कल्पनादिकमिति जिज्ञासितवतीं पार्व्वतीं प्रति भगवतः शिवस्योत्तरदानं तत्रैव १३ उल्लासे ॥

"उपासकानां कार्य्याय पुरैव कथितं प्रिये ! ।
गुणक्रियानुसारेण रूपं देव्याः प्रकल्पितम् ॥
श्वेतपीतादिको वर्णो यथा कृष्णे विलीयते ।
प्रविशन्ति तथा काल्यां सर्व्वभूतानि शैलजे ! ॥
अतस्तस्याः कालशक्तेर्निर्गुणाया निराकृतेः ।
हितायाः प्राप्तयोगानां वर्णः कृष्णो निरूपितः ॥
नित्यायाः कालरूपाया अव्ययायाः शिवात्मनः ।
अमृतत्वात् ललाटेऽस्याः शशिचिह्नं निरूपितम् ॥
शशिसूर्य्याग्निभिर्नित्यै रखिलं कालिकं जगत् ।
सम्पश्यति यतस्तस्मात् कल्पितं नयनत्रयम्" ॥

तस्याः स्थूलध्यानं यथा तत्रैव ५म उल्लासे ।

"मेघाङ्गीं शशिशेखरां त्रिनयनां रक्ताम्बरं बिभ्रतीं पाणिभ्यामभयं वरञ्च विलसद्रक्तारविन्द स्थिताम् ॥

मेघाङ्गीमिति वर्णनेनास्याः कृष्णवर्णत्वं सूचितं परं अरूपाया निराकृतेः कालशक्तेरेव ध्याना-लम्बनतया ज्ञापकत्वमिति यावत् ।

शशिशेखरेत्युक्त्या शशी चन्द्रः जीवसमष्टिः सर्व्वजीववीजस्वरूपो हिरण्यगर्भो ब्रह्मा एव चन्द्रनाम्नाख्यायते अतएवास्या देव्या ललाटे ऊर्द्ध-देशे इति निर्देशात् समस्तजड़शक्तिभ्यः पृथक् कृत्वा जीवशक्तेरुत्कर्षं बोधयति यथा,—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवरूपां महाबाहो ! ययेदं धार्य्यते जगत्" ॥

अतोऽस्या जीवशक्त्याधायकतया सैव परमात्म-रूपिणी चिदानन्दमयीति प्रबोध्यते । यदि च स्थानभेदे क्वचित् परब्रह्मणः सकाशादस्याः पार्थक्यं दृश्यते तत्तु केवलमज्ञानां क्रियाविशेषबोधनायैव स्वरूपतः अग्नेर्दाहिकाशक्तिवत् सर्व्वत्रैव शास्त्रकृद्भिस्तयोरभेदः प्रतिपादितः । त्रिनयन-मित्युक्त्या सर्व्वज्योतिःपदार्थानां प्रधानभूता-श्चन्द्रसूर्य्याग्नयः प्रकाशशक्तेराधिक्यात् तैरेवास्या देव्या नयनत्रितयत्वेन प्रकल्पितं वस्तुतः सर्व्व-प्रकाशकानां सूर्य्यादीनां सैवान्तर्यामितयाधिष्ठात्रीदेवतात्मरूपिणीति बोध्यम् ॥

रक्ताम्बरं बिभ्रतीं इति सृष्टिकरणार्थं सैव परमात्मरूपिणी रजोगुणोद्रेकरूपमम्बरं वस्त्रं आवरणशक्तिमिति भावः बिभ्रतीं धारिणीं । पाणिभ्यामभयं वरञ्च इति भक्तसाधकानां रक्षार्थं कुशलार्थञ्च वराभयदानरूपशक्तिद्वयस्य पाणिद्वयत्वेन कल्पितं रक्तारविन्दस्थितामिति रजोगुणसमुद्भवाया इच्छाशक्तेरेवारविन्दत्वेन प्रकल्पनं कृतमिति बोध्यम् । अतः स्थूलध्यानादीनां यदिचापाततः स्थूलदृष्ट्या नामरूपादिस्थूलजड़भावो लक्ष्यते परं सर्व्वत्रैव तेषां सूक्ष्मार्थरूपपरमात्मन्येव गूढ़तात्पर्य्यार्थः प्रतिफलत्येव विज्ञानद्भिरेव तत्सर्व्वतोज्ञातुं शक्यते । न ह्येतदस्माकं केवलं स्वकपोल-कल्पनामात्रं श्रीमद्भगवद्गीताप्रभृतितत्त्वज्ञान-प्रतिपादकशास्त्रेषु विशेषतोनिश्चितं किञ्च प्रकृतिपुरुषयोरपि तत्तच्छास्त्रे भूयोभूयोऽविनश्वरत्वमनादित्वं चाङ्गीकृतम् ।

"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपीत्यादि" । भूरिभूरि प्रमाणानि सन्ति बाहुल्यभिया नैवास्माभिस्तान्युद्धृतानि ॥)

कालीकः, पुं, (के जले अलति पर्य्याप्नोति प्रभवतीत्यर्थः । अल+इकन् पृषोदरादित्वात् दीर्घः । यद्वा के जले+अलीकः मत्स्यलाभाय कपटशान्त-मूर्त्तिरिव।) क्रौञ्चः । इति शब्दरत्नावली ॥

कालीची, स्त्री, (काल्या यमभगिन्या चीयतेऽत्र । चिञ्+बाहुलकात् अधिकरणे डः । गौरादित्वात् ङीष् ।) यमविचारभूमिः । इति त्रिकाण्ड-शेषः ॥

कालीतनयः, पुं, (काल्याः यमरूपाया यमभगिन्याः यमत्वशक्ते र्वा तनयः इव यमवाहनत्वात्तथात्वम्। यद्वा, कालीं इतः ज्ञातः सन् बलिदानाय आत्मानं नयति प्रापयति । नी+अच् । कालीं प्रति उद्दिश्य वा इतः प्राप्तः उपस्थित इत्यर्थः आत्मनो नयः प्रापणं यस्य । महिषस्य कालीसन्निधाने बलिदानाय नीयमानतया तथात्वम् ।) महिषः । इति हेमचन्द्रः ॥

कालीयं, क्ली, (कालस्य कृष्णवर्णस्यायं कालस्थाने भवं वा "वृद्धाच्छः" । ४ । २ । ११४ । इति छः ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ (अस्य व्यवहारो यथा, वैद्यकचक्रपाणिसंग्रहे एकादशशतिकप्रसारणीतैले । "कालीयोत्पलपद्मकाह्वय-निशेत्यादि" ॥)

कालीयकं, क्ली, (कालीय+स्वार्थे कन् । कालीयमिव कायति वा । कै+कः ।) कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम्। इत्यमरटीकासारसुन्दरी॥ (यथा, महाभारते २ । ५१ । १० ।

"चन्दनागुरुकाष्ठानां भारान् कालीयकस्य च ।
चर्म्मरत्नसुवर्णानां गन्धानाञ्चैव राशयः" ॥)

तत्पर्य्यायः । जायकं २ कालानुसार्य्यं ३ । इत्यमरः । २ । ६ । १२६ ॥ जापकम् ४ । इति टीकासर्व्वस्वम् ॥ कालेयम् ५ वर्णकम् ६ कान्तिदायकम् ७ । इति भरतघृतव्याड़िः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ पीतचन्दनशब्दे द्रष्टव्यौ ॥ कृष्णचन्दनम् । तत्पर्य्यायः । कालीयम् २ कालिकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ (अस्य व्यवहारो यत्र तद्यथा, "सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेष शृङ्गीति निशचन्दनकुचन्दनशिंशपा शिरीषासनधवार्ज्जुनतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति" ॥ इति सुश्रुते । सूत्रस्थाने । ३८ अध्यायः ॥)

कालीयकः, पुं, (कालीय+संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इति शब्दरत्नावली ॥ (अस्य पर्य्याया यथा,—

"दार्व्वी दारुहरिद्रा च पर्ज्जन्यापर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ॥
सैवकालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कालेयं, क्ली, (कं सुखं आलेयं आदेयं यस्मात् ।) कालियानामपीतवर्णसुगन्धिकाष्ठम् । इति व्याड़िः रमानाथश्च ॥ (यथा, कुमारे ७ । ९ ।

"तां लोध्रकल्केन हृताङ्गतैला-
माश्यानकालेयकृताङ्गरागाम्" ॥

कलायै रक्तधारिण्यै'हितं इति ढक् ।) काश्मीरखण्डनम् । यकृत् इति यावत् इति मेदिनी ॥

कालेयः, पुं, (कालाया अपत्यं ढक् ।) दैत्यभेदः । इति मेदिनी ॥ (यथा, महाभारते १ । ६५ । ३४ ।

"कालायाः प्रथिताः पुत्त्राः कालकल्पाः प्रहारिणः।
प्रविख्याता महावीर्य्या दानवेषु परन्तपाः ॥
विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च ।
क्रोधशत्रुस्तथैवान्यः कालेया इति विश्रुताः" ॥)

कालेयकं, क्ली, (कालेय+स्वार्थे कन् ।) कालीयकम् । कालियानाम पीतवर्णसुगन्धिकाष्ठम् । इत्यमर-टीका । ("मधुकरकुलकलङ्ककालीकृतकालेयक-कुसुमकुड्मलेषु" । इति कादम्बरी ॥)

कालेयकः, पुं, (कालेय+संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इत्यमरः २।४।१०१ ॥ (यथा, सुश्रुते सूत्रस्थाने ३९ अध्यायः । "कालेयकागुरुतिलपर्णी कुष्ठहरिद्रेति" ॥ कालीयकशब्देऽस्य विवरणं ज्ञातव्यम् ॥ कलये विवादाय साधुः । कल+ढक्+संज्ञायां कन् । कुक्कुराणां हि अन्योन्यकलहपरत्वं प्रसिद्धम् ।) कुक्कुरः । इति राज-निर्घण्टः ॥

काल्पः, पुं, (कल्पे विधौ भवः । "तत्र भवः" ४ । ३ । ५३ । इति अण् ।) हरिद्राविशेषः । काँचा हलुद इति भाषा । तत्पर्य्यायः । कर्व्वूरः २ द्राविड़कः ३ द्राविड़भूतिकः ४ । इति शब्दरत्नावली ।

काल्पकः,पुं,(कल्पे विधौ भवः। "तत्र भवः"। ४।३।५३। इत्यणन्तात् संज्ञायां स्वार्थे वा कन् ।) कर्व्वूरकः । इत्यमरः २।४।१२५ ॥ काँचा हलुद इति भाषा ॥

काल्पनिकः, त्रि, (कल्पनायाः आगतः । ठञ् ।) कल्पनाभवः । कल्पितः । यथा । "रसः स्वाद्यते इति काल्पनिकं भेदमुरीकृत्य कर्म्मकर्त्तरि वा प्रयोगः" । इति साहित्यदर्पणम् ॥

काल्यं, क्ली, (कलयति चेष्टाम् । अघ्न्यादयश्चेति कलेर्यक् । ततः प्रज्ञाद्यण् ।) प्रत्यूषः । इति हेम-चन्द्रः॥ (यथा हेः रामायणे २ । ३४ । ३४ ।

"तर्पितः सर्व्वकामैस्त्वं श्वः काल्ये साधयिष्यसि" ॥)

काल्यकः, पुं, (काले साधुः । तत्र साधुरिति यत् । स्वार्थे कन् ।) काल्पकः । इति शब्दरत्नावली ॥

काल्या, स्त्री, (कालः प्राप्तोऽस्याः । कालाद्यत् । टाप् च ।) गर्भग्रहणप्राप्तकाला ऋतुमती गौः । तत्पर्य्यायः । उपसर्य्या २ । इत्यमरः । २ । ९ । ७० ॥ ("उपसर्य्या काल्या प्रजने" । इति पाणिनिः । ३ । १ । १०४ ॥)

कावचिकं, क्ली, (कवचिनां समूहः । "ठञ् कवचिनश्च" । ४ । २ । ४१ । इति ठञ् ।) वर्म्मिष्टता